# परिशिष्टम्

## वर्णविचारः

### 1. वर्णाः

संस्कृते इदानीं 48 वर्णानां प्रयोगः भवति। ते मुख्यतया भागत्रयेण विभक्ताः सन्ति, 1–स्वराः 2–व्यञ्जनानि 3–अयोगवाहाश्चेति, यथा–

**स्वराः–13**

- **ह्रस्वस्वराः–5**
  अ, इ, उ, ऋ, लृ
- **दीर्घस्वराः–8**
  आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ

**व्यञ्जनानि–33**

- **वर्गीयव्यञ्जनानि–25**
  क्, ख्, ग्, घ्, ङ्,
  च्, छ्, ज्, झ्, ञ्,
  ट्, ठ्, ड्, ढ्, ण्,
  त्, थ्, द्, ध्, न्,
  प्, फ्, ब्, भ्, म्,
- **अवर्गीयव्यञ्जनानि–8**
  - **अन्तस्थाः–4**
    य्, र्, ल्, व्,
  - **ऊष्माणः–4**
    श्, ष्, स्, ह्,

**अयोगवाहौ–2**

- **अनुस्वारः**
- **विसर्गः**

## 2. उच्चारणस्थानानि

वर्णाभिव्यक्तिप्रदेशः स्थानं कथ्यते। शब्दप्रयोगसमये कायाग्निना प्रेरितः वायुः कण्ठादिस्थानेषु सञ्चरन् वर्णान् अभिव्यनक्ति। यथोक्तं पाणिनीयशिक्षायाम्–

**आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ॥**
**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥**

एवम् वर्णानाम् उच्चारणस्थानानि अष्टौ सन्ति। (*i*) उरः (*ii*) कण्ठः (*iii*) शिरः (*iv*) जिह्वामूलम् (*v*) दन्ताः (*vi*) नासिका (*vii*) ओष्ठौ (*viii*) तालुः। तद्यथा–

| वर्णाः | उत्पत्तिस्थानानि | वर्णानां संज्ञा |
|---|---|---|
| अ, आ, क्, ख्, ग्, घ्, ङ्, ह्, विसर्गः | कण्ठः | कण्ठ्यः |
| इ, ई, च्, छ्, ज्, झ्, ञ्, य्, श् | तालुः | तालव्यः |
| ऋ, ॠ, ट्, ठ्, ड्, ढ्, ण्, र्, ष् | मूर्धा | मूर्धन्यः |
| लृ, त्, थ्, द्, ध्, न्, ल्, स् | दन्ताः | दन्त्यः |
| उ, ऊ, प्, फ्, ब्, भ्, म् | ओष्ठौ | ओष्ठ्यः |
| ङ्, ञ्, ण्, न्, म् | नासिका + कण्ठादीनि | नासिक्यः |
| ए, ऐ | कण्ठतालू | कण्ठतालव्यः |
| ओ, औ | कण्ठोष्ठम् | कण्ठोष्ठ्यः |
| व | दन्तोष्ठम् | दन्त्योष्ठ्यः |
| अनुस्वारः | नासिका | नासिक्यः |